# Shakti SutrAni

# શક્તિસૂત્રાણિ

## Document Information

Text title : Shakti Sutras by Sage Agastya

File name : shaktisuutra.itx

Category : sUtra, devii, otherforms, agastya, devI

Location : doc_devii

Author : Agastya RiShi

Transliterated by : Michael Magee <ac70 at cityscape.co.uk>

Proofread by : Mike Magee, Ruma Dewan

Description-comments : Shakti Sutras attributed to Agastya

Latest update : August 12, 2023

Send corrections to : Mike Magee <ac70@cityscape.co.uk>

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2023

*sanskritdocuments.org*

# શક્તિસૂત્રાણિ

અથ શક્તિસૂત્રાણિ
ભગવદગસ્ત્યવિરચિતાનિ ।

અથાતઃ શક્તિજિજ્ઞાસા ॥ ૧॥

યત્કર્ત્રી ॥ ૨॥

યદજા ॥ ૩॥

નાન્તરયોઽત્ર ॥ ૪॥

તત્સાન્નિધ્યાત્ ॥ ૫॥

તત્કલ્પકત્વમૌપાધિકમ્ ॥ ૬॥

સમાનધર્મત્વાત્ ॥ ૭॥

તચ્ચ પ્રાતિભાસિકમ્ ॥ ૮॥

યદ્બન્ધઃ ॥ ૯॥

યદારોપાધ્યાસાદૈક્યમ્ ॥ ૧૦॥

શબ્દાધિષ્ટાનલિઙ્ગમ્ ॥ ૧૧॥

નાનાવાન્ ॥ ૧૨॥

તચ્ચ કાલિકમ્ ॥ ૧૩॥

અખણ્ડોપાધે ॥ ૧૪॥

યામેવ ભૂતાનિ વિશન્તિ ॥ ૧૫॥

યદોતં યત્પ્રોતમ્ ॥ ૧૬॥

તદ્વિષ્ણુત્વાત્ ॥ ૧૭॥

તતો જગન્તિ કિયન્તિ ॥ ૧૮॥

નાનાત્વેઽપ્યેકત્વમ્વિરુદ્ધમ્ ॥ ૧૯॥

વિચારાત્ ॥ ૨૦॥

યસ્માદદૃશ્યં દૃશ્યઞ્ચ ॥ ૨૧॥

દૃષ્ટિત્વવ્યપદેશાદ્વા ॥ ૨૨॥

અવિનાભાવિત્વાત્ ॥ ૨૩॥

ભિન્નત્વે નાનિયામ્યત્વે ॥ ૨૪॥

અતથાવિધા ॥ ૨૫॥

યત્કૃતિઃ ॥ ૨૬॥

ઇચ્છાજ્ઞાનક્રિયાસ્વરૂપત્વાત્ ॥ ૨૭॥

ન સન્નાસત્ ॥ ૨૮॥

સદસત્ત્વાત્ ॥ ૨૯॥

તદ્ભ્રાન્તિઃ ॥ ૩૦॥

યત્સત્ ॥ ૩૧॥

ઇદાનીમુપાધિવિચારઃ ક્રિયતે ॥ ૩૨॥

લીયત તત્રૈકદેશપ્રવાદઃ ॥ ૩૩॥

યસ્માત્તારતભ્યમ્ જન્તૂનામ્ ॥૩૪॥

સૌમ્યં જનનમરણયોઃ ॥ ૩૫॥

પૌનઃપુન્યાત્ ॥ ૩૬॥

યદેવ સંસારઃ ॥ ૩૭॥

ઊર્ણનાભિઃ ॥ ૩૮॥

સાદૃશ્યાનન્ત્યમ્ ॥ ૩૯॥

તત્સિદ્ધિરેવ સિદ્ધિઃ ॥ ૪૦॥

તદ્વત્ત્વાત્ ॥ ૪૧॥

યચ્ચૈતન્યભેદ (ભદે) પ્રમાણમ્ ॥ ૪૨॥

તદ્બુદ્ધેઃ ॥ ૪૩ ॥

તન્નાશે તન્નાશઃ ॥ ૪૪ ॥

ભૂતભૌતિકૌ ॥ ૪૫ ॥

અન્યથાજ્ઞેયત્વં ભાવાત્ ॥ ૪૬ ॥

તન્નિર્લેપઃ પુષ્કરપર્ણતત્ત્વવત્ ॥ ૪૭ ॥

સતઃ ॥ ૪૮ ॥

પુષ્પગન્ધવત્ ॥ ૪૯ ॥

મૂક્તાઃ સર્વો બધ્દ્ધઃ સર્વઃ ॥ ૫૦ ॥

યદ્વિલાસાત્ ॥ ૫૧ ॥

તત્ સ્રષ્ટુ (?) ત્વાનુમિતેઃ ॥ ૫૨ ॥

અઙ્ગાન્તરં વ્યભિચરિતમ્ ॥ ૫૩ ॥

નો દોષઃ ॥ ૫૪ ॥

યદ્દ્યદ્યત્પુરાણઃ (sic) ॥ ૫૫ ॥

ભ્રામ્યતે જન્તુઃ ॥ ૫૬ ॥

ભ્રશ્યતે સ્વર્ગાત્ ॥ ૫૭ ॥

આરોગ્યસ્ય ॥ ૫૮ ॥

નિર્વિકારે ક્રિયાભાવાત્ ॥ ૫૯ ॥

બન્ધમોક્ષયોશ્ચ ॥ ૬૦ ॥

સર્વત્ર ચિન્ત્યમ્ ॥ ૬૧ ॥

શૂન્યત્વો વા નિગલવત્ (sic) ॥ ૬૨ ॥

પીતવિષવદ્વિરોધોપલબ્ધેઃ ॥ ૬૩ ॥

તદ્યોગાત્ તદ્યોગઃ ॥ ૬૪ ॥

તદ્ભોગે તદ્ભોગ ઇતિ ॥ ૬૫ ॥

તત્ત્યાગસ્તદ્વ્યપ્યત્વત્ ॥ ૬૬ ॥

બન્ધનૈયત્ત્યાપત્તેઃ ॥ ૬૭॥

નાસ્તીતિ ભ્રમઃ ॥ ૬૮॥

અસ્તીત્યતિરિક્તમપિ ॥ ૬૯॥

પક્ષાન્તરાસિદ્ધેઃ ॥ ૭૦॥

તદભાવાભાવાત્ ॥ ૭૧॥

લિઙ્ગમલિઙ્ગ્યં તલ્લિઙ્ગમ્ ॥ ૭૨॥

પ્રાબલ્યાત્ ॥ ૭૩॥

વશીકૃતેશિત્વાત્કામિનીત્વાન્મોહકત્વાદ્વા ॥ ૭૪॥

યન્માતાપિતરૌ ॥ ૭૫॥

બીજોત્પત્તેરૈન્દ્રજાલિકમ્ ॥ ૭૬॥

ન તજ્જાતેઃ ॥ ૭૭॥

નિર્ગુણત્વાત્ ॥ ૭૮॥

તત્કામિત્વાદ્વ્યાસઃ ॥ ૭૯॥

તત્પરો જૈમિનિઃ ॥ ૮૦॥

તત્સ્વાભિન્નો હયાનનશ્ચ ॥ ૮૧॥

ઉક્તવાનગસ્ત્યઃ ॥ ૮૨॥

તદ્વેદી વૈષ્કલાયનઃ ॥ ૮૩॥

કણ્ઠઃ કર્ત્તૃત્વમ્ ॥ ૮૪॥

પરાશરઃ પ્રાબલ્યમ્ ॥ ૮૫॥

વશિષ્ઠો મોહનમ્ ॥૮૬॥

શુકસ્ત્વાત્મનમ્ ॥ ૮૭॥

માતરં નારદઃ ॥ ૮૮॥

મન્વાનાસ્તરન્તિ સંસારમ્ ॥ ૮૯॥

ઉક્તલિઙ્ગૈઃ સદ્ભિઃ પ્રમાણૈઃ ॥ ૯૦॥

તત્તુ તિત્તિરિઃ ॥ ૯૧ ॥

છન્દોકાશ્ચ (?) ગાશ્ચ ॥ ૯૨ ॥

મારીચસ્તદ્વાદી ॥ ૯૩ ॥

યચ્છિવઃ ॥ ૯૪ ॥

હરિરન્તર્ગુરુર્બહિઃ ॥ ૯૫ ॥

કાલો ભેદે દુરુદ્બોધ્યઃ ॥ ૯૬ ॥

તલ્લેશાઃ ॥ ૯૭ ॥

દહરવ્યાપિત્વાત્ ॥ ૯૮ ॥

તત્પરાત્તદ્બહિઃ ॥ ૯૯ ॥

એવં બ્રહ્મવિદઃ ॥ ૧૦૦ ॥

અધર્માત્તદ્બન્ધઃ ॥ ૧૦૧ ॥

ધર્મો હિ વૃત્તૌ ॥ ૧૦૨ ॥

ન મોહે હિંસા ચ યસ્યાઃ ॥ ૧૦૩ ॥

અતશ્ચિત્તપ્રમાદઃ ॥ ૧૦૪ ॥

ગૌર્ભરિણીમાઠરાયણોઃ (sic) ॥ ૧૦૫ ॥

ન હિ વેદો ન હિ વેદ તદ્વિદઃ ॥ ૧૦૬ ॥

વિન્દતિ વેદાન્પ્રકૃતિમ્ ॥ ૧૦૭ ॥

તરતિ તાં તસ્માત્ ॥ ૧૦૮ ॥

બ્રહ્મભૂયાય કલ્પતે બ્રહ્મભૂયાય કલ્પત ઇતિ ॥ ૧૦૯ ॥

વિદિત્વૈવં તરતિ ॥ ૧૧૦ ॥

યત્કૃત્વા ॥ ૧૧૧ ॥

જૈમિનિરનાત્મેતિ ॥ ૧૧૨ ॥

ગૌણીતિ પ્રાચુર્યાત્ ॥ ૧૧૩ ॥

॥ ઇતિ શક્તિસૂત્રાણિ ॥

Based on the commentary available in the manuscript, શાક્તેયસૂત્રાણિ રચયિતુકામો ભગવાનગસ્ત્યઃ પ્રથમં તાવત્ “અથાતઃ શક્તિજિજ્ઞાસા” ઇતિ સૂત્રમારબ્ધવાન્ । the Sutras are ascribed to Agastya. The commentary runs only upto the 19th Sutra. The Sutras are important as setting forth the philosophy of the Shakti cult.

અથ શક્તિસૂત્રવ્યાખ્યા ।
ઇહ ખલુ અલ્પાયુરલ્પવીર્યમન્દબુદ્ધિમતઃ અવિદ્યાસાગરાદાત્માનમુદ્ધર્તું સામર્થ્યાભાવેનાશક્નુવતો લોકાનાલોક્ય કૃપયાજ્ઞાનગાઢાન્ધકારપ્રદીપાનિ (?) શાક્તેયસૂત્રાણિ રચયિતુકામો ભગવાન્ અગસ્ત્યઃ પ્રથમં તાવત્ “અથાતઃ શક્તિજિજ્ઞાસા” ઇતિ સૂત્રમારબ્ધવાન્ ।
અત્ર શ્રુતિસમાનાર્થત્વાત્ કર્ત્તવ્યેતિ । અથશબ્દ ઉચ્ચારણમાત્રેણ મઙ્ગલાર્થઃ, અર્થસ્ત્વાનન્તર્યમ્ । તથા ચ-સાધનચતુષ્ટયસંપત્ત્યનન્તરમ્ । અતઃ ધર્માદીનાં ક્રમશશ્ચૈવ આધિક્યાત્ (?), યાગાદીનાં ચિરકાલપ્રયાસસાધ્યત્વેઽપિ ફલં પ્રતિ સંશયરૂપત્વાત્, વેદાન્તે તાવત્ “આત્મા વારે દ્રષ્ટવ્યઃ શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યઃ” ઇત્યત્ર પ્રથમં તાવત્ દર્શનમનૂદ્યા (?) શ્રોતવ્યાદીનાં બહુવિધતર્કસાધ્યત્વેન બાલાનામબોધકત્વાદિતિ હેતોઃ શક્તિજિજ્ઞાસા કર્ત્તવ્યેતિ ॥

શક્તેર્જિજ્ઞાસા શક્તિજિજ્ઞાસા । કા નામ શક્તિઃ । શક્ લૃ શક્તાવિત્યસ્માદ્ ધાતોઃ ક્તિન્પ્રત્યયે શક્તિરિતિ । સર્વભૂતાનામન્તર્યામિતયા પ્રકાશયિતું શક્નોતિ ઇત્યર્થઃ । તથા ચ સૂત્રમ્ “યાં વિના ન ગતિર્ગમ્યતે” । જ્ઞાતુમિચ્છા જિજ્ઞાસા । અથ સુખસાધ્યતયા અનાયાસેન જ્ઞાનમુત્પાદ્યત ઇત્યર્થઃ । તથા ચ શ્રુતિઃ “અન્ધં તમઃ પ્રવિશન્તિ યેઽવિદ્યામુપાસતે” ઇતિ । એવમનુબન્ધચતુષ્ટયં નિરૂપિતમ્ ॥ ૧॥

નનુ વેદાન્તાદ્યનન્તસૂત્રાણાં વિદ્યમાનત્વાત્ કિમર્થમપૂર્વશક્તિરિત્યાક્ષિપ્ય પ્રતિ(વિ)ધત્તે “યત્કર્ત્રી” ઇતિ । નનુ વેદાન્તે બ્રહ્મેતિ, સાઙ્ખ્યાદિષુ ચિત્તમિતિ, સગુણેષ્વીશ્વર ઇતિ યદુચ્યતે તદેવ શક્તિરિત્યસ્મિન્ પ્રતિપાદ્યતે । યત્પુંસ્ત્વેન (?) જગજન્માદિકારણત્વમિતિ શાસ્ત્રાદિષુ નિરૂપિતં સૈવ કર્ત્રી । જગતઃ ઇતિ શેષઃ । ઇત્થમ્ - એકૈવ સત્ત્વરજસ્તમોગુણભેદેન બ્રહ્મવિષ્ણવાદિરૂપતાં ભજતે । તથા ચ સૂત્રમ્ - “યશ્ચૈ(ચ્ચૈ) તન્ચભેદે પ્રમાણમ્” ઇતિ । શ્રુતિશ્ચ “પરાસ્ય શક્તિર્વિવિધૈવ શ્રૂયતે” ઇત્યાદિ ॥ ૨॥

નન્વેતાદૃશસ્વલ્પાયા (?) મનોયોનિત્વાત્ મનસઃ કૃતકત્વેનાનિત્યત્વાત્ કાષ્ઠાગ્નિવન્નાશિનઃ અસત્વે સર્વજ્ઞત્વં ન ભવતીત્યાશઙ્ક્યાહ ભગવાન્ અગસ્ત્યઃ “યદજા” । યત્કારણમજા ઉત્પત્તિમન્ન, યદ્વિલાસાત્ સૃષ્ટ્યાદિરિતિ । તસ્માત્ સર્વજ્ઞરૂપ્યેવ કારણમ્ । નનુ તાદૃકરૂપાપ્રસિદ્ધા ન જિજ્ઞાસિતવ્યા, યદ્યપ્રસિદ્ધા નૈવ શક્ત્યા (? શક્યા) જિજ્ઞાસિતુમ્ । ઇત્યાક્ષિપ્ય પ્રસિદ્ધૈવ । કુતઃ । અહમસ્મીત્યાત્મપ્રત્યક્ષવિષયત્વાત્ । આત્મૈવ તાદૃશસ્વરૂપાપ્રસિદ્ધાપિ (?) દેહમાત્રમાત્મેતિ, મનોમાત્રં નાત્મેતિ (?) સંશયાદિવારણાય તાદૃશરૂપજિજ્ઞાસા અવશ્યં કર્ત્તવ્યા । નનુ તાદૃશસ્ય કિં પ્રમાણમિત્યાકાઙ્ક્ષાયાં “મનોયોનિત્વાત્ મનઃ યોનિઃ કારણમ્ પ્રમાણં તસ્ય

ભાવઃ તત્ત્વાત્ । શ્રુતિઃ - “મનસ્યેવેદમાપ્તવ્યં નેહ નાનાસ્તિ કિઞ્ચન” । “યતો વાચો નિવર્ત્તન્તે અપ્રાપ્ય મનસા સહ” ઇતિ શ્રુતિસ્તુ અપક્વ(?)મુપલક્ષણમ્ । મનસીતિ નિશ્ચિત્યાપ્તવ્યમ્ - ઇત્યભિપ્રાયઃ ॥ ૩॥

નનુ મનસા નિશ્ચિતત્વવિષયે ઔપનિષત્સાઙ્ખ્યયોગાદીનાં વૈયર્થ્યાપત્તિરિતિ નિશ્ચિત્યાહ । “નાન્તરાયોઽત્ર” । અન્તરે મધ્યે ઈયતે પ્રાપ્યતે ઇતિ । અત્ર મનોનિશ્ચયવિષયે મધ્યે પ્રાપ્ય શાસ્ત્રં ન કિઞ્ચિદપિ । ઇતરેષાં બહુપ્રયાસત્વેન એતેનૈવાલમિત્યભિપ્રાયઃ ॥ ૪॥

નન્વીદૃશમાહાત્મ્યં કુતઃ સ્યાદત આહ- “તત્ સાન્નિધ્યાત્” । તસ્મિન્ સાન્નિધ્યં તત્સ્થત્વં તસ્માત્ । વિકલન (?) માત્રેણાનિતરાપેક્ષં જ્ઞાનમુત્પદ્યત ઇતિ યાવત્ ॥ ૫॥

નનુ તત્-સ્થત્વાત્ અણુત્વાપત્તિરિત્યાશઙ્ક્ય “તત્કલ્પકત્વમૌપાધિકમ્” ઇતિ । તત્કલ્પકત્વમણુત્વાદિનિર્દ્દેશકત્વમૌપાધિકમ્ ઉપાધિવશાન્નેતવ્યમ્ । કુતઃ । સર્વવ્યાપિત્વાત્ ॥ ૬॥

અત્ર શઙ્કતે । સર્વવ્યાપિત્વેન પ્રકાશકત્વમુપપદ્યતે । કુતઃ । “સમાનધર્મત્વાત્” । સમાના ધર્માઃ ચૈતન્યવ્યાપ્યત્વાદયઃ । તેષાં ભાવઃ તસ્માત્ તત્સ્થત્વં નોપપદ્યતે ॥ ૭॥

તસ્યાહોભિર્વાધિકરણવતિ સ્વપ્રકાશકત્વમુપપદ્યતે વા । ભાસ્યતે અનેનેતિ ભાસઃ । પ્રતિભાસે ભવં પ્રાતિભાસિકમ્ । સ્વપ્રકાશયોગ્યં તચ્ચૈતન્યમપ્યાદર્શમુખવત્ બુદ્ધૌ બોધયિતવ્યમ્ । તર્હિ “યદોતં યત્ પ્રોતમ્” ઇતિ સૂત્રસ્ય વૈયર્થ્યાપત્તેઃ । વસ્તુતઃ આદર્શને અસત્તા (? અસત્ત્વા) દિતિ ચેત્ । ન । સાભ્રનક્ષત્રસ્ય અપરિચ્છિન્નસ્ય જલાદૌ વિદ્યમાનત્વાત્ । અત્રાહ ॥ ૮॥

યદ્યેવમતોઽસ્ય અજ્ઞાનમેવ બન્ધઃ જીવસ્યોપજીવ્યતે, બન્ધસ્ય મિથ્યાત્વાત્ । તતશ્ચોત્તરત્ર સૂત્રકાર એવ વક્ષ્યતિ । તથા ચ મનોમાત્રકલન (?) એવ સર્વં ન તુ કિઞ્ચિદત્રાસ્તિ । કુતઃ । “નેહ નાના” ઇતિ શ્રુતેઃ ॥ ૯॥

યદારોપસ્ય યત્પ્રતીતેઃ । તથા ચ સૂત્રમ્- “યાં વિના ન ગતિર્ગમ્યતે” । યદ્ રૂપાદીનામધ્યાસાદિના પ્રતીયમાનમેવ । તથા ચ સ્મરન્તિ “અસ્તિ ભાતિ પ્રિયં રૂપં નામ ચૈક્યં વિભેદતઃ । આદ્યત્રયં બ્રહ્મરૂપં જગદ્રૂપં તતોઽદ્વયમ્” ॥ ઇત્યાદિવાક્યાચ્ચ ॥ ૧૦॥

તચ્છક્તિમયેન પ્રતિભાવ્યમાનં જગદધિષ્ઠાનસ્ય કારણસ્ય લિઙ્ગં ગમકમ્ । નનુ એતાદૃશમોહનમાત્રેણ જગદ્રૂપેણ કિમર્થં પરિણમિતા, પરિણામિન્યાઃ યતત્વાત્ (૧) પરિણામસ્યાપિ તત્ત્વાત્ । અનેકેષાં સત્યત્વે કથં જ્ઞાનેન વ્યાવર્ત્તેત । બાઢમ્ । વ્યાવહારિકપારમાર્થિકભેદેનાઙ્ગી કૃતત્વાત્ ॥ ૧૧॥

નનુ કથં જ્ઞેયઃ નાનાદીનાં વિદ્યમાનત્વાત્ । કિઞ્ચ નાનાદિષ્વાધ્યારોપિતત્વાત । તથા ચ સૂત્રાણિ - “તત્ કામિત્વાત્” (ઇત્યૂ) આરભ્ય “મન્વાનાસ્તરન્તિ સંસારમ્” ઇત્યન્તાનિ ગમકાનિ । સાઙ્ખ્યકૃદ્ભિશ્ચ “નાનોપાધિષુ યન્નાનારૂપં ભાત્યનલાર્કવત્ । તત્ સમં સર્વભૂતેષુ” ઇત્યાદિ ॥ ૧૨॥

નનુ સર્વેષાં તદ્વ્યાપ્યત્વેન “સર્વં પ્રકૃતિમયમ્” ઇતિ સૂત્રેણ સકલજનાનાં વ્યાવહારિકત્વેનૈવ સિદ્ધે સર્વેષાં મોક્ષાપત્તિઃ । અત આહ । તચ્ચ વ્યાપકત્વઞ્ચ । કાલિકં કાલસમ્બન્ધાન્નેતવ્યમ્ । નનુ (?) સદા વિદ્યતે સર્વેષાં સતતયથાનેન (?) । તથા ચ સર્વં તદ્રૂપેણ નિશ્ચેતવ્યં, ન તુ સ્વરૂપેણ ॥ ૧૩॥

અખણ્ડેષુ સમસ્તેષુ ઉપાધિઃ સમ્બન્ધઃ યસ્યાઃ । સમત્વાત્ । શ્રુત્યા ચ ગમ્યતે ॥ ૧૪॥

નુ પાપપુણ્યતારતમ્યેન સ્વર્ગનરકાદ્યુચ્ચાવચેષુ પ્રવિશમાનાઃ તત્રસ્થાનામપેક્ષયાનુભવન્તિ । તસ્માન્ન સર્વનિયન્તૃત્વમ્ ઇતિ ચેન્ન । યામેવ ભૂતાનિ વિશન્તિ પ્રવિશન્તિ તદ્રૂપેણ અધિકારાદિત્યર્થઃ । તદ્વિષયમુત્તરત્ર વક્ષ્યતિ ॥ ૧૫॥

નનુ તદ્રૂપત્વં કથં સમ્ભવતિ, એકસ્ય સર્વત્રાન્વયાસમ્ભવાદિત્યત આહ "યદોતં યત્પ્રોતમ્" ઇતિ । યેન કારણેન ઓતં વ્યાપ્તં યેન જગતા પ્રોતં તન્તુપટવત્ । ઇત્થં કારણં વિહાય ન કદાપિ વર્ત્તતે । કાર્યં નામ કારણાનન્યત્વમ્ । કારણસત્તાવ્યતિરિક્તસત્તાશૂન્યત્વમિતિ યાવત્ । તથા ચ સર્વે તદ્રૂપા ઇતિ નોક્તદોષઃ ॥ ૧૬॥

નન્વાકાશવત્ તદ્વ્યાપકત્વં કથમત આહ- "તદ્વિષ્ણુત્વાત્" । તસ્ય કારણસ્ય વિષ્ણુત્વાત્ વ્યાપકત્વાત્ । વિપ્લૂ વ્યાપ્તાવિતિ । ઉણાદિના "ણુ" પ્રત્યયઃ । તથા ચ આકાશવત્ સર્વગતસ્ય નિત્યઃ । તથા ચ સૂત્રમપિ ॥ ૧૭॥

નનુ જલસ્થલનભઓકસામનેકેષામપિ એકયાધિષ્ઠાતૃત્વં ન ભાવ્યતે । અત આહ- "તતો જગન્તિ કિયન્તિ" । તત એવ કિયન્તિ, પરમાણૂનારભ્ય ભૂતપર્યન્તાનિ જગન્તિ ઉત્પદ્યન્તે । તથા ચૈકશાસ્ત્રકર્ત્તા (૧) તત્સર્વજ્ઞાનં યથા ભવતિ તીર્થતરઃ પ્રભૂતઃ તદ્વદત્રાપિ યોજનીયમ્ । કુતઃ । તસ્યા એવ મૂલત્વાત્ કારણત્વાત્ । શ્રુતિશ્ચ "સુ (?) મૃત્યુરાસીત્" ઇત્યાદિ । તત્ પ્રથમત આકાશાદિરૂપેણ પરિણમિતેત્યર્થઃ ॥ ૧૮॥

નનુ એકસ્યાનેકરૂપત્વં કથમુપપદ્યતે । પરિણામોપલબ્ધેઃ । પરિણામસ્ય અનેક પરિણમિતસ્યોપલબ્ધેર્દૃષ્ટત્વાત્ । લોકે ચ મૃદાદિષુ । શ્રુતિશ્ચ "તત્ સ્રષ્ટા" ઇત્યાદિઃ । બ્રહ્મસૂત્રેઽપિ "અંશો । નાનાવ્યપદેશાદ્" ઇત્યાદિ । નનુ પરિણામિત્વવ્યપદેશાત્ સર્વાકારં કારણમાસીત્ । સર્વજ્ઞાનેન વિષયાદિજ્ઞાનાનાં પ્રયોજનત્વમેવ । તથા ચ પરિણામસ્ય અનિત્યત્વસ્ય દૃષ્ટત્વાત્ "એષ જનો અમૃતઃ" ઇત્યાદિશ્રુતિકોપોપલબ્ધિપ્રસઙ્ગ ઇતિ ચેન્ન । નાનાસ્વરૂપેણ સ્થિતત્વેઽપિ એકત્વં કૂટસ્થત્વમ્ અવિરુદ્ધમ્ । ન દોષઃ । દૃષ્ટત્વાત્ । ઘટાદિષુ મૃત્ત્વેનૈવૈકત્વમ્ । અત્ર પરિણામત્વઞ્ચ વિવૃત્તત્વં (?) વિષમસત્તાકકાર્યત્વમ્ । વાચારમ્ભણશ્રુતિશ્ચ કારણસ્યૈવ સત્યત્વં બ્રવીતિ ॥ ૧૯॥

The commentary (on 19 sUtras) is as it is found in the transcript. The possible errors are marked with (?). Even with doubts, it is yet important as showing the traditional way of interpreting the Sutras.

Encoded and proofread by Mike Magee

Proofread by Mike Magee, Ruma Dewan

*Shakti SutrAni*

pdf was typeset on August 12, 2023

Please send corrections to *sanskrit@cheerful.com*